# ॥ कृष्णद्वादशनामस्तोत्रम् ॥

श्रृणुध्वं मुनयः सर्वे गोपालस्य महात्मनः।
अनन्तस्याप्रमेयस्य नामद्वाशकं स्तवम् ॥

अर्जुनाय पुरा गीतं गोपालेन महात्मना।
द्वारकायां प्रार्थयते यशोदायाश्च सन्निधौ ॥

## ॥ ध्यानम् ॥

जानुभ्यामपि धावन्तं बाहुभ्यामतिसुन्दरम्।
सकुण्डलालकं बालं गोपालं चिन्तयेदुषः ॥

## ॥ स्तोत्रम् ॥

प्रथमं तु हरिं विद्याद् द्वितीयं केशवं तथा।
तृतीयं पद्मनाभं तु चतुर्थं वामनं तथा ॥ १ ॥

पञ्चमं वेदगर्भं च षष्ठं तु मधुसूदनं।
सप्तमं वासुदेवं च वराहं चाष्टमं तथा ॥ २ ॥

नवमं पुण्डरीकाक्षं दशमं तु जनार्दनम्।
कृष्णमेकादशं प्रोक्तं द्वादशं श्रीधरं तथा ॥ ३ ॥

एतद् द्वादशनामानि मया प्रोक्तानि फाल्गुन।
कालत्रये पठेद्यस्तु तस्य पुण्यफलं श्रृणु ॥ ४ ॥

चान्द्रायणसहस्रस्य कन्यादानशतस्य च।
अश्वमेधसहस्रस्य फलमाप्नोति मानवः ॥ ५ ॥

॥ इति श्री-कृष्णद्वादशनामस्तोत्रं सम्पूर्णम् ॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Krishna_Dwadasha_Nama_Stotram.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits